L
1949
M10
RIT UNIVERSITY

SASTHRAMUKTAVALI—31, 32.

XXIV 10 69

MOKSHAKARANATHAVADA
AND
DRSYATHVANUMANANIRASA

BY

Sri Anandalwar Swami
Of Melkot.

EDITED BY

P. B. ANANTHACHARYA.

Printed at the

SRI SUDARSANA PRESS

Conjeevcram

1909

PRICE AS- 4.

Copy Right Registered

शास्त्रमुक्तावळी—३१, ३२.

श्रीशैलानन्तपूरुषवंश्येन यादवाद्रिनिवासिना

अनन्ताचार्येण

विरचितौ

मोक्षकारणतावादः-
दृश्यत्वानुमाननिरासवादश्च

इत्येतौ,

श्रीकाञ्चीप्रतिवादिभयङ्करम् अनन्ताचार्येण

परिशोधितौ

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्येताम् ।

श्रीकाञ्ची ।

१९०९

एतन्मूल्यम्— ०—४—०

श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

दृश्यत्वानुमाननिरासवादः ।

श्रीश्रीनिवासपरकालयतीश्वराणां
विद्वद्वरिष्ठकलिते किल सन्निधाने ।
योभूत्प्रसङ्गवशतो विषय स्सएष
सलिख्यते क्रमवशेन कुतूहलेन ॥
स्वामिनस्तत्र मध्यस्था वादिनो रामशास्त्रिणः ।
अनन्तार्यश्च कुतुकात् प्रपेदे प्रतिवादिताम् ॥

अत्रेयं वादिनः प्रथमा कक्ष्या—

विमतं मिथ्या दृश्यत्वादित्यनुमाने हेतुभूतदृश्यत्वं च स्वसमानसत्ताकज्ञानविषयत्वम् । तत्र ज्ञाने स्वसमानसत्ताकत्व निवेशात् ब्रह्मणि न व्यभिचारः । अत्र स्वसमानसत्ताकत्वञ्च स्वानाशकज्ञानानाश्यत्वम् , तेन सत्तात्रैविद्ध्यसिद्धेर्मिथ्यात्वसिद्ध्यनन्तर भावित्वेपि नान्योन्याश्रयः । नवा घटादिज्ञानस्य कस्यचित् घटाद्य-नाशकेन पटादिज्ञानेनोत्तरवर्तिना नाश्यत्वेपि क्षतिः । इच्छाद्यव्यव-हितपूर्वोत्पन्नघटादिज्ञानमादायैव हेतूपपादनात् । यादृशविषयविशेषविष-यकज्ञानसामान्यं इच्छाद्यव्यवहितपूर्ववृत्तिभिन्नम् तादृशविषयश्चाप्रसिद्ध एव, सर्वस्यापि वस्तुन इच्छाद्यव्यवहितपूर्ववर्तिनि सर्वं प्रमेयमित्याका-रकयत्किञ्चिज्ज्ञाने विषयत्वात् । नच ब्रह्मणि प्रतिवादिरीत्या ब्रह्मानाशक ज्ञानानाश्यज्ञानविषयत्वसत्त्वात् सन्दिग्धव्यभिचार इति वाच्यम् , स्वानाश-कज्ञाननाश्यत्वेनाद्वैतमतसिद्धं यत्तदन्यज्ञानविषयत्वस्य विवक्षितत्वात् ; ब्रह्मज्ञानसामान्यस्य ब्रह्मज्ञाननाश्यत्वेनाद्वैतमतसिद्धतया तदन्यत्वाभावात् ।

इत्थं च स्वनिष्ठनाशकतासम्बन्धावच्छिन्नप्रतियोगिताकाभाववज्ज्ञाननाश्यत्व प्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवज्ज्ञानविषयत्व, तादात्म्योभयसम्बन्धेन किञ्चिद्विशिष्टत्वं दृश्यत्वमिति फलितम् । तेन नाननुगमः । नवा तादात्म्यनिवेशात् घटादिकं स्वपदेनोपादाय ब्रह्मणि व्यभिचार इति ।

अत्र प्रतिवादिनो द्वितीया कक्ष्या—

इच्छाद्यव्यवहितपूर्वोत्पन्नब्रह्मज्ञानमादाय ब्रह्मणि व्यभिचारो दुर्वार इति ।

अत्र वादिन स्तृतीया कक्ष्या—

स्वानाशकज्ञाननाश्यस्वस्वोपादानान्यतरकत्वेनाद्वैतिसिद्धं यत् तदन्यज्ञानविषयत्वस्य विवक्षणात् न ब्रह्मणि व्यभिचार इति । इदानीन्त नेच्छाऽव्यवहितपूर्वोत्पन्नब्रह्मज्ञानस्य ब्रह्मज्ञाननाश्यत्वेनाद्वैत्यभिमतभिन्नत्वेपि तदुपादानस्याखण्डाकारवृत्तिनाश्यत्वेनाद्वैत्यभिमततया ब्रह्मज्ञाने स्वानाशक ज्ञाननाश्यस्वस्वोपादानान्यतरकत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयभिन्नत्वाभावान्नोक्तव्यभिचार इति ।

तत्र प्रतिवादिनश्चतुर्थी कक्ष्या—

वृत्तेः सूक्ष्मावस्था हि तदुपादानम् , सैव संस्कारः, तथाच इच्छाद्यव्यवहितपूर्वोत्पन्नघटादिज्ञानसंस्कारस्य तदुपादानात्मकस्य घटादेस्स्मृत्या चरमस्मृत्या वा नाशात् घटादाव सिद्धिः ; घटादिज्ञानस्य घटाद्यनाशकघटादिस्मृतिनाश्योपादानकत्वेनाद्वैतिसिद्धत्वेन तद्भिन्नत्वाभावादिति ।

तदुपरि वादिनः पञ्चमी कक्ष्या —

स्वनिष्ठबाधकतासम्बन्धावच्छिन्नप्रतियोगिताकाभाववज्ज्ञानबाध्यत्व प्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताक प्रति

प्रतियोगिताकभेदवज्ज्ञानविषयत्वतादात्म्योभयसम्बन्धेन किञ्चिद्विशिष्टत्वं दृश्यत्वमिति फलितम् । अत्र तादृशज्ञानबाध्यत्वञ्च तादृशज्ञानप्रयुक्तस्वस्वोपादानान्यतरत्वावच्छिन्नाभावकत्वम् । तथाच — घटादिज्ञानोपादानत्वावच्छिन्नाभावस्य ब्रह्मज्ञानमात्रप्रयुक्तत्वात्, तस्य च घटाद्यबाधकत्वविरहेण स्वाबाधकं शुक्त्यादिज्ञानमेव; तद्बाध्यत्वप्रकारका द्वैतिसम्बन्धिज्ञानविषयमिन्नं घटादिज्ञानमिति नासिद्धिरिति ।

अत्र प्रतिवादिनष्षष्ठी कक्ष्या—

सर्वं ज्ञानं शुक्तिज्ञानबाध्यमित्यद्वैतिनो भ्रमसम्भवात्तदीयविषयतायास्सकलज्ञानसाधारण्यात्, तादृशज्ञानविषयत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवज्ज्ञानाप्रसिद्ध्या स्वपदेन घटादेरुपादानासम्भवादसिद्धिः । अद्वैतिसम्बन्धिप्रमाविषयत्वनिवेशेच सन्दिग्धासिद्धिः, अद्वैतिनस्तादृशबाध्यत्वप्रकारकज्ञाने प्रमात्वस्योभयबाधसिद्धत्वादिति ।

अत्र वादिनस्सप्तमी कक्ष्या—

यादृशव्यक्तेरेतादृशभ्रमो न कदापि प्रसिद्ध्यति, तादृशाद्वैतिव्यक्तेरेव तद्व्यक्तित्वेन निवेशान्न दोष इति ।

अत्र प्रतिवादिनो ऽष्टमी कक्ष्या—

तादृशव्यक्तेरप्रसिद्धिरेव, सर्वेषामेव चेतनानामयोग्यताज्ञानविरहदशायां सर्वं ज्ञानं शुक्तिज्ञानबाध्यमिति वाक्याद्बोधस्य दुर्वारत्वात् । अयोग्यताज्ञानजन्यसंस्कारस्य प्रतिबन्धकत्वेपि यद्रूपावच्छिन्नधर्मिकमयोग्यताज्ञानं संस्कारोवा, तदन्यरूपावच्छिन्नधर्मिकबोधस्य शब्दादुरपह्नवत्वादिति ।

अत्र वादिनो नवमी कक्ष्या—

यादृशकालावच्छेदेन यद्व्यक्ते रेतादृशभ्रमो नास्ति, तादृशकालावच्छिन्नतत्पुरुषीयबाध्यत्वप्रकारकज्ञाननिवेशान्न दोष इति ।

अत्र प्रतिवादिनो दशमी कक्ष्या—

स्वनिष्ठबाध्यत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वतादात्म्योभयसम्बन्धेन किञ्चिद्विशिष्टत्वस्य हेतुत्वसम्भवादेतादृशायासो व्यर्थ इति । एतदुक्तं भवति- नीलधूमत्वादिवारणाय व्याप्यतावच्छेदकधर्मान्तराघटितस्य व्याप्यता वच्छेदकत्ववत् हेतुतावच्छेदकसम्बन्धतावच्छेदकान्तराघटितस्य हेतुता वच्छेदकसम्बन्धतावच्छेदकत्वस्य काकदन्तसमानकालीनज्ञानविषयत्वतादा त्म्योभयत्वस्य तादृशसम्बन्धतावच्छेदकत्ववारणाय अवश्यं स्वीकरणीय तया निरुक्ततादृशोभयत्वस्य बाध्यत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयतात्व रूपलघुधर्मघटिततया तादृशसम्बन्धतावच्छेदकत्वासम्भवात् व्याप्यत्वा सिद्धिरधिकोक्तिर्वा निग्रहस्थानमिति । ननु स्वसमानाधिकरणव्याप्यता वच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्ववत्स्वसमानाधिकरण हेतुतावच्छेदकसम्बन्धतावच्छेदकान्तराघटितस्यैव हेतुतावच्छेदकस — म्बन्धतावच्छेदकत्वनियमस्वीकारेपि प्रकृते न दोषः, तादृश ज्ञानविषयत्वतादात्म्योभयत्वसामानाधिकरण्यस्य उक्ताद्वैतिसम्बन्धि — ज्ञानविषयतात्वे अभावेन निरुक्तोभयत्वे तादृशसम्बन्धतावच्छेदकघटितत्वस्या किञ्चित्करत्वादिति चेन्न;— प्रथमनियमे स्वसामानाधिकरण्यनिवेशस्या साम्प्रदायिकताया ब्रह्मानन्देनोक्तत्वात् । एवं हि तत्रत्या पङ्क्तिः— " किञ्च ईश्वरवादपक्षधरीये तादृशधर्मान्तराघटितत्वेन हेतुतावच्छेदकं विशेषणीय मित्युक्तम्, तत्र तादृशपदं साध्यसम्बन्धितावच्छेदकपरम्, पूर्वग्रन्थे तस्यैव प्रक्रान्तत्वात्, तथाच स्वसामानाधिकरण्यनिवेशस्य तान्त्रिक सम्प्रदायासिद्धत्वात् स्वकपोलकल्पितत्वं निर्युक्तिकत्वं चे " ति । एवञ्च द्वितीयनियमेपि स्वसामानाधिकरण्यानिवेशादुक्तोभयत्वस्य हेतुता वच्छेदकसम्बन्धतावच्छेदकत्वं न सम्भवतीति ।

एतदुपरि वादिनः एकादशी कक्ष्या—

उक्तोभयसम्बन्धेन धर्मत्वेन हेतुता न स्वीक्रियते, येनोक्तदोषः, किन्तु तादृशोभयसम्बन्धेन तादृशधर्मविशिष्टस्य तादात्म्येन हेतुता

स्वीक्रियते । नच तथापि काकदन्तसमानकालीनज्ञानविषयसंयोगेन नीलधूमविशिष्टस्य तादात्म्येन हेतुत्ववारणाय हेतुतावच्छेदकतावच्छेदक सम्बन्धस्थले एतादृशनियम आवश्यक इति वाच्यम् ; यतस्तादृशस्थल एवायं नियमः, नान्यत्र । यत्र लघुसम्बन्धेन हेतुतावच्छेदकविशिष्टस्य गुरु सम्बन्धेन तद्विशिष्टघटकता, यथा— उक्तज्ञानविषयसंयोगेन धूमविशिष्टे शुद्धसंयोगेन धूमविशिष्टस्य घटकता, तत्रैवायं दोषः । अन्यथा समवायावच्छिन्नप्रतियोगिताकाभाववत्तासम्बन्धेन संयोगविशिष्टस्यापि हेतुत्वं न स्यात् , शुद्धसमवायस्य तादृशविशिष्टघटकत्वादिति ।

अत्र प्रतिवादिनो द्वादशी कक्ष्या—

स्वाबाधकाबाध्यज्ञानविषयत्वकालीनघटकालीनकाकदन्तकालीनज्ञान विषयत्वतादात्म्योभयत्वस्यापि तादृशसम्बन्धतावच्छेदकत्वापत्तिः, उक्तो भयसम्बन्धेन धर्मविशिष्टे स्वाबाधकाबाध्यज्ञानविषयत्वतादात्म्योभयसम्बन्धेन धर्मविशिष्टस्याघटकत्वादुक्तनियमस्यानवकाशादिति अन्यत्राप्युक्तनियमस्य स्वीकार्यतया प्रकृतेप्युक्तदोषो दुर्वार इति ।

अत्रवादिनस्त्रयोदशी कक्ष्या—

उक्तापत्तेरिष्टत्वादन्यत्र तादृशनियमो न स्वीक्रियत इति ।

एतां त्रयोदशीं कक्ष्यां स्वामिनस्ससभासदः ।
शास्त्रार्थसारग्रहणे कुशला नानुमेनिरे ॥

इदन्तु तत्त्वम् — येन सम्बन्धेन यत्र यत्सम्बध्यते तत्र तत्सम्बन्धावच्छिन्नतदभावमङ्गीकुर्वतामद्वैतिनां स्वपदेन घटाद्युपादानेपि बाधकतासम्बन्धेन घटाभाववज्ज्ञानं ब्रह्मज्ञानमपीति तद्बाध्यत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वसम्बन्धावच्छिन्नघटनिष्ठावच्छेदकता-कभेदवज्ज्ञानाप्रसिद्धिः । नच स्वाभावस्थाने बाधकतासम्बन्धावच्छिन्न

स्वनिष्ठावच्छेदकताकभेदनिवेशान्नैष दोष इति वाच्यम्, समानाधिकरणप्रतीतिस्थले सर्वत्र भेदाभेदोभयभानं स्वीकुर्वतां भवतां बाधकता सम्बन्धेन घटविशिष्टं ब्रह्मज्ञानमिति समानाधिकरणप्रतीतिबलात् तत्रापि बाधकतासम्बन्धावच्छिन्नघटनिष्ठावच्छेदकताकभेदस्यावश्यकत्वात्, अन्यथा भेदाभेदसाधकस्य समानाधिकृतत्वहेतोर्व्यभिचारापत्तेः । नच द्रव्यं घट इत्यादाविव बाधकतासम्बन्धेन घटविशिष्टं ब्रह्मज्ञानमित्यत्राप्यौपाधिकभेदभानमभ्युपगम्यते, तथाच बाधकतासम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकानौपाधिकभेदनिवेशे न दोष इति वाच्यम्; यतः अनौपाधिकभेदवत्त्वं तद्धर्मयोर्योभेदः तदन्यो यः तद्धर्मोपहितयोर्भेदस्तद्रूपम्, तथाच तदुपहितयोर्भेदस्तद्धर्मभेद इति समानाधिकरणधीबलात्तदुपहितभेदेपि तद्धर्मभेदभिन्नत्वस्यावश्यकत्वादनौपाधिकत्वमिति । अनौपाधिकत्वसम्बन्धघटकभेदेपि अनौपाधिकत्वनिवेशेऽनवस्था । नन्वेवमपि घटादौ हेतूपपत्तिस्सम्भवति, ब्रह्मज्ञानस्य घटादिनिष्ठबाधकत्वसम्बन्धावच्छिन्नावच्छेदकताकभेदवत्त्वेपि तादृशज्ञानबाध्यत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वसम्बन्धावच्छिन्नघटादिनिष्ठावच्छेदकताकभेदस्य घटादिज्ञानादौ सुलभत्वात् तत्रापि निरुक्तबाध्यत्वप्रकारकाद्वैतिसम्बन्धिज्ञानविषयत्वसम्बन्धेन घटविशिष्टं घटज्ञानमिति समानाधिकरणधीसम्भवादिति चेन्न;— उक्तरीत्या ब्रह्मणि व्यभिचारतादवस्थ्यात्, स्वपदेन ब्रह्मोपादानेपि तन्निष्ठतत्सम्बन्धावच्छिन्नावच्छेदकताकभेदस्य ब्रह्मज्ञाने सुलभत्वात् ; तत्रापि तादृशसम्बन्धेन ब्रह्मविशिष्टं ब्रह्मज्ञानमिति समानाधिकरणधीसम्भवात् । एवं घटादिकं स्वपदेनोपादायापि ब्रह्मणि व्यभिचारो दुर्वारः, घटतादात्म्यस्यापि ब्रह्मणि सम्भवात् ।

नच स्वनिष्ठोभयावृत्तिधर्मरूपं तादात्म्यं ब्रह्मणि न सम्भवतीति वाच्यम्; ब्रह्मघटयोर्भेदाभेदाङ्गीकारेण भेदस्य विशेषणवृत्त्युभयावृत्तिधर्मरूपताया भवदीयैरर्वाचीनैरुक्तत्वात् "घटस्सन्" इति धीबलात्

घटवृत्त्युभयावृत्तिधर्मस्य ब्रह्मण्यावश्यकत्वात् । विशेषणवृत्त्युभयावृत्तिधर्मरूपभेदस्य भानानुपगमेच घटवृत्त्यनुगतधर्ममादायैव ब्रह्मणि व्यभिचारः । उभयावृत्तित्वस्य उभयवृत्तित्वात्यन्ताभावरूपत्वेपि उभयवृत्तिभेदरूपत्वेपि च तदधिकरणे तदत्यन्ताभावस्य समानाधिकरणप्रतीतिस्थले भेदाभेद भानमङ्गीकुर्वताम्मते ऽनुगतधर्मे उभयावृत्तित्वस्य चावश्यकत्वात् । नच तादात्म्यस्य स्वनिरूपिताधेयतानिरूपकत्वरूपत्वान्नोक्तरीत्या ब्रह्मणि-व्यभिचारः, घटनिरूपिताधेयतानिरूपकत्वस्य च ब्रह्मण्यभावादिति वाच्यम्; घटनिरूपिताधेयताया ब्रह्मनिरूपितायाश्चानुगतधर्मनिष्ठाधेयतायाश्च तद्धर्मरूपतया ऐक्यादुक्तव्यभिचारतादवस्थ्यात् ।

नच आधेयता अतिरिक्तैव, अथवा स्वनिरूपिताधेयतानिरूपकताकत्वं वा निवेश्यमिति नोक्तदोष इति वाच्यम्; आधेयताया आधेयतात्वस्य चानतिरिक्तत्वं वदतामस्माकं मते ब्रह्मणि हेतुसम्भवेन सन्दिग्धानैकान्त्यस्य दुर्वारत्वात् ।

तस्माद्भेदाभेदवादं मिथ्यात्ववादं वा परित्यज्यैव उक्तपरिष्कारो ब्रह्मानन्दाद्युक्ता अन्येपि च भेदघटिता अत्यन्ताभावघटिताश्च परिष्कारास्संरक्षणीया इत्यलं पल्लवितेन ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम्॥

इति श्रीशैलानन्तपूरुषकुलतिलकेन यादवाद्रिनिवासिना अनन्तार्येण

विरचितो

दृश्यत्वानुमाननिरासवादः ।

श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

मोक्षकारणतावादः ।

इह तावन्मोक्षस्य मुख्यसाधनं विचार्यते । मोक्षो नाम स्वसामानाधिकरण्य स्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यो यः कर्मध्वंसः स्वसामानाधिकरण्य स्वोत्तरत्वोभयसम्बन्धेन तद्विशिष्ट आनन्दः । केवलानन्दस्य उक्तसम्बन्धेन कर्मध्वंसविशिष्टानन्दस्य च बद्धदशायामपि सत्त्वात् तदानीं मोक्षव्यवहारवारणाय कर्मप्रागभावविशिष्टान्यत्वं ध्वंसविशेषणम् ।

उक्तं च "अत्ता चराचरग्रहणादि" त्यधिकरणभाष्ये—

"त्र्यन्तनिष्णातास्तु निखिलजगदेककारणस्याशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकाऽनवधिकातिशयासङ्ख्येय कल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणश्शरीरतया प्रकारभूतस्यानुकूलापरिच्छिन्नज्ञानस्वरूपस्य परात्मानुभवैकरसस्य जीवस्य अनादिकर्मरूपाविद्यातिरोहितस्वरूपस्या विद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षत" इति ।

अयमर्थः, निखिलजगदेककारणस्य- कार्यत्वावच्छिन्नकार्यतानिरूपित कारणताश्रयस्य । एकत्वम् - मुख्यत्वम् , स्वसत्ताकालीनकारणान्तरविरहप्रयुक्ताभावप्रतियोगिकार्यकभिन्नत्वम् । स्वसत्ताच स्वनिरूपितकारणतावच्छेदकसम्बन्धावच्छिन्नाधिकरणता ग्राह्या, तेनेश्वरसत्ताकाले कारणान्तरविरहेण घटाद्यनुत्पत्तावपि न क्षतिः । ईश्वरस्य कालिकसम्बन्धेन

कार्यं प्रति तत्तत्कार्यविषयकस्वीयसङ्कल्पसम्बन्धेन कारणत्वात्, तेन सम्बन्धेनेश्वरसत्तादशायां तत्तत्कार्यविरहस्याप्रसिद्धेः । 'अशेषे' ति । हेयगुणत्वावच्छिन्नावच्छेदकताकभेदवत्त्वे सति ध्वंसप्रागभावाप्रतियोगित्वे सति ज्ञानानन्दाभिन्नस्येत्यर्थः । हेयत्वं च पापफलानुभवोद्देश्यकसृष्टिविषयत्वम्, दुःखादिरूपचेतनधर्मकटुरसादिरूपाचेतनधर्मोभयसाधारणम् । 'स्वाभाविके' ति । स्वाभाविकाः अनवधिकातिशयाः असङ्ख्येयाश्च ये कल्याणगुणाः तेषाम्, आकरस्य— अपृथक्सिद्धिसम्बन्धेनाधारस्येत्यर्थः । स्वाभाविकत्वं च, स्वाश्रयाधिकरणकालत्वव्यापकस्वनिरूपिताधिकरणताकत्वम्, ध्वंसप्रागभावाप्रतियोगित्वपर्यवसितम् । अनवधिकातिशयत्वं च ज्ञानस्य स्वाविषयीकृतपदार्थविषयकस्वभिन्नज्ञानकं यत्स्वं तदन्यत्वम् । एवमिच्छादेरपि वाच्यम् । सामान्यतो निर्वक्तव्यत्वे तु, स्वाप्रयोज्य स्वासाधारणकार्यप्रयोजकस्वभिन्नगुणकं यत्स्वं तदन्यत्वम् । स्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नसङ्ख्यासामान्याभाववदाधेयतावच्छेदकधर्मावच्छिन्नत्वमसङ्ख्येयत्वम् । स्वपदं सङ्ख्यापरम् । मेयत्वावच्छेदेन कस्याश्चिदपि सङ्ख्याप्रतियोगिकपर्याप्तेरभावेन तादृशप्रमेयत्वादिकमादाय परिमितगुणानामप्यसङ्ख्येयत्ववारणाय आधेयतावच्छेदकत्वं धर्मविशेषणम् । किञ्चिन्निरूपिताधेयतानतिरिक्तवृत्तित्वं तदर्थः । पुरुषार्थप्रयोजकत्वं कल्याणत्वम् । 'अपरिच्छिन्ने' ति । सर्वमूर्तद्रव्यसंयुक्तज्ञानापृथक्सिद्धस्येत्यर्थः । अपरिच्छिन्नत्वञ्च, सर्वमूर्तद्रव्यसंयुक्तावच्छेदकोभयावृत्तिधर्मवत्त्वम् । तेन बद्धदशायामपि तादृशज्ञानत्वसत्त्वेपि न दोषः । 'अनादी' त्यादि । अनादिकर्माभिन्नं यदविद्यापदवाच्यं तत्तिरोहितस्वरूपस्येत्यर्थः । कर्मण्यनादित्वं च, प्रागभावाप्रतियोगित्वम् । केषाञ्चित्कर्मणां प्रागभावप्रतियोगित्वाङ्गीकारेपि परमात्मसाक्षात्कारत्वरूपावस्थाप्रतिबन्धककर्मण एवात्र कर्मपदेन विवक्षितत्वात् तस्य प्रागभावप्रतियोगित्वानङ्गीकारात् । यदिच, ध्वंसप्रतियोगित्वव्यापकं प्रागभावप्रतियोगित्वमिति तादृशकर्मणोपि प्रागभावप्रतियोगित्वं दुर्वारमित्युच्यते, तदा

स्वसामानाधिकरण्य स्वसमानकालीनत्वोभयसम्बन्धेन कर्मात्यन्ताभाव-विशिष्टप्रागभावाप्रतियोगित्वरूपं प्रवाहतोऽनादित्वमेवानादिपदेन विवक्षितम् । कर्मप्रागभावाधिकरणात्मनि तत्कालावच्छेदेन कर्मान्तरसत्त्वेन तदत्यन्ताभावविशिष्टः प्रागभावो घटप्रागभाव एव, तदप्रतियोगित्वं च कर्मण्यक्षतम् । सर्वसाधारणं प्रवाहतोऽनादित्वं च, स्वाश्रयप्रतियोगिकध्वंसव्यापकस्वाश्रयप्रतियोगिकप्रागभाववद्धर्मकत्वम् । रामत्वाश्रयैतत्कल्पव्यक्ति-प्रतियोगिकप्रागभावस्य पूर्वकल्पगतरामत्वाश्रयव्यक्तिप्रतियोगिकध्वंसव्यापकत्वात् रामत्वेन रूपेण रामावताराणां प्रवाहतोऽनादित्वोपपत्तिः । प्रमेयत्वद्रव्यत्वादिना सर्वेषाम्प्रवाहतोऽनादित्वमिष्टमेव । तादृशकर्मणा तिरोहितस्वरूपत्वंच, तत्प्रयुक्तानुत्पादप्रतियोगिपरमात्मसाक्षात्कारकत्वम् । अविद्यायाः - कर्मणः, उच्छेदः - उत्कृष्टध्वंसः । ध्वंसे उत्कर्षश्च, निरुक्तोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यत्वमेव । तादृशध्वंसपूर्वकत्वं च स्वसामानाधिकरण्य स्वोत्तरत्वोभयसम्बन्धेन ध्वंसविशिष्टत्वम् । परमात्मानुभवरूपानन्दे स्वाभाविकत्वं च न तावन्नित्यत्वम्, बाधात्; किन्तु प्रतिबन्धकाभावातिरिक्तकारणान्तरानिरपेक्षत्वम् । तच्च प्रतिबन्धकाभावाधिकरणात्मनि तत्कालावच्छेदेन विद्यमानाभावाप्रतियोगित्वम् । तेन तादृशानन्दे उपासनादेः प्रतिबन्धकाभावातिरिक्तस्य हेतुत्वेपि न क्षतिः । मेघापगमे स्वाभाविकस्सूर्यप्रकाशप्रसर इत्यादौ स्वाभाविकपदेन प्रतिबन्धकाभावातिरिक्तकारणान्तरानिरपेक्षत्वबोधनात् । परमात्मानुभवपदेन आनन्दो विवक्षितः । तादृशकर्मध्वंसविशिष्टपरमात्मानुभवस्यैव मोक्षत्वे "स यदि पितृलोककामो भवती" त्यादिश्रुतिसिद्धपित्राद्यनुभवस्य मोक्षत्वानुपपत्तिरिति तादृशकर्मध्वंसविशिष्टानन्द एव तथाभ्युपगतः । मोक्षमाचक्षते – मोक्षपदवाच्यं वदन्तीत्यर्थः ।

यत्तु "अविद्यानिवृत्तिरेव मोक्ष इत्यभ्युपगम्यत" इति जिज्ञासाधिकरणभाष्यम्, तदपि विशेषणतया अविद्यानिवृत्तेर्मोक्षपदवाच्य-

तापरम् , न तु विशेष्यतया तत्पदवाच्यतापरमिति न विरोधः । तथा च कर्मध्वंसविशिष्टानन्दवानेव मुक्तपदार्थः । यद्यपि गत इत्यादौ गमनस्येव मुक्त इत्यादौ मोक्षस्यातीतत्वं प्रतीयते, तथापि अविद्याध्वंस विशिष्टानन्दस्य मुक्तिपदार्थतया लड्घटकोत्पत्तिमदभावरूपध्वंसपदार्थैकदेशोत्पत्तौ तस्यान्वयसम्भवान्न दोषः । यदि च कदाचिदपि अविद्यासम्बन्ध शून्ये परब्रह्मणि लक्ष्म्यादौ च नित्यमुक्तत्वव्यवहारः प्रामाणिकः, तदा शुद्धसत्त्वदेशानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववदानन्द एव मुक्तिपदार्थः । मुक्तस्य वैकुण्ठादन्यत्र सञ्चारकालेपि जायमान आनन्दश्शुद्धसत्त्वमयदेह रूपदेशावच्छिन्न एव । मुक्तादिगतानवच्छिन्नसुखस्यापि सङ्ग्रहायोभयाभावनिवेशः । अत्र कल्पे मुक्त इत्यादौ क्तप्रत्ययातीतत्वस्यान्वयायोग्यत्वादविवक्षैवेति ध्येयम् ।

निरुक्तमोक्षं प्रति कारणञ्च ध्यानरूपो ज्ञानविशेषः । "ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिन्तमसः परस्ता" दित्यादिश्रुत्या देशविशेषावच्छिन्नभगवदनुभवरूपानन्दं प्रति ध्यानस्य कारणताबोधनात् । अत्र यद्यपि ध्यानमुक्त्योः पूर्वोत्तरकालीनत्वमात्रं प्रतीयते, न हेतुहेतुमद्भावः; तथापि सिद्धसाध्यसमभिव्याहारस्थले यस्य यदपेक्षया प्राक्कालीनत्व रूपं सिद्धत्वं प्रतीयते असति बाधके तस्य तद्धेतुत्वम् , यस्य यदपेक्षया उत्तरकालोत्पत्तिकत्वं यत्समानकालीनप्रागभावप्रतियोगित्वरूपं साध्यत्वं प्रतीयते तस्य तद्धेतुकत्वं प्रतीयत इति व्युत्पत्तेः , पक्त्वा भुङ्क्ते पाथसि पीते तृष्णा शाम्यतीत्यादितः पाकभोजनपाथःपानतृष्णाशान्त्यादेः पौर्वापर्यवन्मिथो हेतुहेतुमद्भावस्यापि लाभात् , उत्तरकालत्वमात्रशक्तस्यापि क्त्वाप्रत्ययस्य जन्यत्वे लक्षणाङ्गीकाराच्च, ध्यानहेतुकत्वस्य मुक्तौ लाभः । वस्तुतस्सिद्धान्ते पदजन्यपदार्थोपस्थितिविषयस्येव अर्थापत्तिविषयस्यापि शाब्दबोधे भानाङ्गीकारादसति बाधके सिद्धसाध्यसमभिव्याहारेणाभिधानं हेतुहेतुमद्भावपरत्वं विनाऽनुपपन्नमित्यर्थापत्तिवशादेव कार्यकारणभाव-

लाभः । एवमेव भूतयोनिपदसमभिव्याहृतगमिधात्वर्थभगवत्साक्षात्कार-रूपानन्दे तमसः परस्तादित्यनेन देशविशेषावच्छिन्नत्वमात्रबोधेपि देश-विशेषावच्छिन्नत्वस्य देशविशेषानवच्छिन्नत्वावच्छिन्नत्वोभयाभावव्याप्य-तया अर्थापत्तिवशादेव उभयाभाववदानन्दत्वरूपमुक्तित्वलाभः । उक्त-रीत्यैवच "ज्ञात्वा देवं मुच्यते सर्वपाशैः ।" "भिद्यते हृदयग्रन्थि-श्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इत्यादौ कार्यकारणभावबोधनिर्वाहः । परावरे तस्मिन्दृष्टे अस्य कर्माणि क्षीयन्त इति योजनावशाद्दर्शनविषयाभिन्नस्वभिन्नत्वव्यापकापकर्षावध्यभिन्नभगवद्-र्शनोत्तरकालीनत्वस्य कर्मक्षये प्रतीतेः । परे अवरे यस्मादिति व्युत्पत्ति-लभ्यस्य स्वभिन्नत्वव्यापकापकर्षावधित्वविशिष्टस्य परावरपदार्थस्याभेदेन तत्पदार्थे, तत्पदार्थस्य सप्तम्यर्थे दर्शने, दर्शनस्योत्तरकालीनत्वसम्बन्धेन कर्मक्षयेन्वयेनोक्तार्थलाभात् । "ब्रह्मविदाप्नोति परम्" "ज्ञात्वादेव" मित्यादिश्रुतिघटकयोर्ज्ञानत्वरूपसामान्यधर्मावच्छिन्नवाचकयोरपि पदयोः ध्यानत्वरूपविशेषधर्मावच्छिन्नबोधकत्वं लक्षणया, ज्ञानस्य मोक्षकारणत्वं ध्यानत्वं विनानुपपन्नामित्यर्थापत्त्या वा सम्भवति । यथा— "अग्नीषो-मीयं पशुमालभेते" ति श्रुतिघटकस्य सामान्यवाचिनः पशुशब्दस्य "छागस्य वपाया मेदस" इति मन्त्रवर्णश्रुतछागत्वरूपविशेषधर्मावच्छिन्न बोधकत्वं लक्षणयार्थापत्त्या वा सम्भवतीति "छागो वा मन्त्रवर्णादि" ति न्यायसिद्धम् । "ब्रह्मविदाप्नोति पर" मित्यादौ उद्देश्यतावच्छेदकविधे-ययोस्संसर्गतया कार्यकारणभावभानस्य धनवान् सुखीत्यादाविव क्लप्त-त्वात् तादृशश्रुतेरपि मोक्षकारणतावोधकत्वमव्याहतम् । अत्र यद्यपि ब्रह्मप्राप्तिरूपानन्द एव प्रतीयते, नतु कर्मप्रागभावविशिष्टान्यकर्मध्वंस विशिष्टत्वं निरुक्तोभयाभाववत्त्वं वा, तथापि प्राप्नोतीत्यस्य उक्तध्वंसादि विशिष्टानन्दे लक्षणास्वीकारात् मोक्षबोधोपपत्तिः । एतदभिप्रेत्यैव जिज्ञासाधिकरणभाष्ये इदं वाक्यं ब्रह्मज्ञानस्याक्षयफलत्वं दर्शयतीत्युक्तम् ।

ध्यानत्वं च स्वसमानविषयकत्व स्वाव्यवहितोत्तरत्व स्वसामानाधिकरण्यै तत्त्रितयसम्बन्धेन स्मृतिविशिष्टस्मृतिविशिष्टस्मृतित्वम्, समानाकारस्मृति-व्यक्तित्रयसद्भावे ध्यायतीति व्यवहारात् । मोक्षजनकतावच्छेदककोटौ दर्शनसमानाकारत्वमपि निवेश्यम्, "तस्मिन्दृष्टे परावरे" "आत्मावा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिभिर्दर्शनसमाना-कारध्यानस्य मोक्षकारणताबोधनात् । दर्शनसमानाकारत्वं च साक्षात्करो-मीत्यादिप्रतीतिनियामकलौकिकविषयतावत्त्वम् । अनवरतभावनायां हि ध्यानस्य लौकिकविषयतावत्त्वं सम्भवति, "वृक्षे वृक्षे च पश्यामि चीर कृष्णाजिनाम्बरम्" इत्यादौ तद्दर्शनात् । नच ईश्वरस्य रूपरहितत्वेन चाक्षुषलौकिकप्रत्यक्षविषयत्वासम्भवेपि मानसप्रत्यक्षं सम्भवति, ज्ञान-प्रत्यासत्तेस्सत्वादिति तदेवात्र मोक्षकारणत्वेन विवक्षितमिति वाच्यम्; ज्ञानप्रत्यासत्तिघटितप्रत्यक्षसामग्र्यपेक्षया तदघटितज्ञानसामग्रीमात्रस्य प्र-बलत्वेन निदिध्यासनकाले स्मृतिसामग्रीसत्त्वनैय्यत्येन निदिध्यासनानन्तर मुपनीतप्रत्यक्षासम्भवात्; अन्यथा स्मृतिसन्तानात्मकध्यानस्यैवानुपपत्तेः द्वितीयादिज्ञानानामुपनीतसाक्षात्कारत्वापातात्; अनुमितिशाब्दज्ञानादिस्थले तत्प्रसङ्गश्च । प्रत्यभिज्ञायान्तु समानविशेष्यकलौकिकप्रत्यक्षसामग्र्या प्रति-बन्धात् स्मृतिसामग्री नेति ज्ञानप्रत्यासत्तिघटितसामग्र्या तत्तादृशप्रत्यक्ष मुत्पाद्यते ।

ननु 'ध्यानं च तैलाधारावदविच्छिन्नस्मृतिसन्तानरूपमि' ति जिज्ञासा-धिकरणभाष्यानुरोधाद्दर्शनसमानाकारस्मृतेरेव मोक्षकारणत्वध्यानोपासनादि-शब्दवाच्यत्वाङ्गीकारे परमात्मप्रकारकस्वात्मविशेष्यकानुसन्धानस्य स्वात्मांशे लौकिकप्रत्यक्षात्मकस्य ध्यानोपासनादिपदवाच्यत्वमोक्षकारणत्वाद्यनुपपत्तिः, 'ओमित्येतदक्षरमुद्गीथमुपासीते' त्यादिप्रतिपादितोद्गीथाद्युपासनानुप-पत्तिश्च; न च स्वात्मांशे उद्गीथाद्यंशे च संस्कारादिरूपस्मृतिसामग्री-सत्त्वात् स्मृतिस्सम्भवतीति नानुपपत्तिरिति वाच्यम्, स्मृतिं प्रति लौकिक-प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेन स्मृतिसामग्रीसत्तादशायां स्वात्मादौ

लौकिकप्रत्यक्षसामाग्रीसत्त्वनियमेन स्मृत्यसम्भवात् ; लौकिकप्रत्यक्षसामग्र्याः स्मृतिं प्रति प्रतिबन्धकत्वानङ्गीकारे च प्रत्यभिज्ञाया विलोपापत्तिः, तस्याः पूर्वं स्मृतिसामग्रीसत्त्वनियमेन स्मृतेरेव सम्भवात् ; नच लौकिक प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेपि स्मृतिर्मे जायतामितीच्छाया उत्तेजकत्वात् तादृशेच्छावशात् स्वात्मादौ ध्यानोपपत्तिरिति वाच्यम्, उक्तरीत्या प्रथमद्वितीयस्मृत्युपपादनेपि तृतीयचतुर्थस्मृत्युपपादनासम्भवात् ; इच्छायोग्यताया उत्तेजकत्वेपि च षष्ठसप्तमादिस्मृत्युपपादनासम्भवात् ; मध्ये इच्छान्तरस्वीकारेचाविच्छिन्नस्मृतिधारात्वानुपपत्तिः, इच्छया व्यवधानात् ; इति चेन्न;— ज्ञानेच्छयोर्यौगपद्यस्वीकारेण स्मृत्युत्पत्तिदशायामेवेच्छाया अप्युत्पत्त्या तृतीयादिस्मृत्यन्तराव्यवधानरूपधारात्वस्यचोपपत्तेः । यद्वा धारावाहिकप्रत्यक्षसामग्रीस्थले तावत्पर्यन्तस्थायिनी एकैव प्रत्यक्ष व्यक्तिरिति वत् चिरकालस्थाय्येकैकस्मृतिव्यक्तेरेव ध्यानत्वाङ्गीकारान्नानुपपत्तिः, स्मृतिलौकिकप्रत्यक्षसामग्र्योस्संवलनदशायामेकयैवेच्छया विरोधिज्ञानोत्पत्तिपर्यन्तस्थायिन्या एकस्या एव स्मृतिव्यक्तेर्धारात्मिकाया उत्पत्ति सम्भवात् ; तथाचापृथक्सिद्धिसम्बन्धेन निरुक्तानन्दरूपमोक्षं प्रति तत्तद्विद्याप्रतिपादितगुणनिष्ठविषयतानिरूपितब्रह्मनिष्ठसाक्षात्कारत्वव्यञ्जकविषयताकध्यानस्यापृथक्सिद्धिसम्बन्धेन कारणत्वं ग्राह्यम् ।

अत्र यद्यपि मोक्षे वैजात्याभावेन सद्विद्यादहरविद्यादीनां परस्परं व्यभिचारः, सद्विद्यां विनापि दहरविद्यया तां विनापि सद्विद्यया मोक्षस्य जायमानत्वात् ; तथापि तत्तदव्यवहितोत्तरमोक्षं प्रति तत्तद्विद्यानां कारणत्वान्न व्यभिचारः ।

ननु सद्विद्यादहरविद्यादिरूपध्यानव्यक्तिष्वेकां शक्तिं स्वीकृत्य तादृशशक्तिमत्त्वेन मोक्षं प्रति कारणत्वमेकमेव कल्पयितुं युक्तम्, प्रत्येककारणतापक्षेपि सद्विद्यादिष्वेकैकां शक्तिं स्वीकृत्य तस्या

एव कारणतावच्छेदकत्वकल्पनस्यावश्यकत्वात्, अन्यथा तत्तद्विद्याप्रतिपादितगुणनिष्ठविषयतानिरूपितब्रह्मनिष्ठविषयताशालिध्यानत्वेन कारणत्वे ब्रह्मनिष्ठविषयतानिरूपितगुणनिष्ठविषयतामादाय विनिगमनाविरहेण कारणतावाहुल्यप्रसङ्गात् ; एवं निरूप्यनिरूपकभावापन्नविषयताशालिज्ञानत्वेन कारणत्वे तादृशध्यानाव्यवहितोत्तरमेव मोक्षापत्त्या शरीरपातपर्यन्त विळम्बानुपपत्तिः, शक्तिमत्त्वेन कारणत्वेच मोक्षजनकतावच्छेदिकाया श्शक्तेर्गत्यनन्तरकालीनामानवकरस्पर्शसमानकालीनध्यानव्यक्तिष्वेव स्वीकारात् न ततः पूर्वं मोक्षापत्तिः ; सूचितञ्चेदं "परं जैमिनिर्मुख्यत्वा" दित्यत्र भाष्ये—

"यथाहि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा 'तमेतं वेदानुवचनेने' त्यादि शास्त्रादवगम्यते, तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यत" इति ;

अयमर्थः— स्वसामानाधिकरण्य स्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यकर्मध्वंस एव च निश्शेषाविद्यानिवृत्तिः मोक्षघटकः, तज्जनकतावच्छेदकीभूतध्यानगतशक्तिः देशविशेषसंयोगजन्येति गतिशास्त्रादवगम्यत इति ; तथाच, अमानवकरस्पर्शाधिकरणकाले मोक्षजनकतावच्छेदकीभूतशक्तिविशेषविशिष्टध्यानादिघटितसामग्रीसम्पत्त्या तदुत्तरमेव मोक्षो जायते ; तथाच न्यायसिद्धाञ्जनम्—

"अमानवकरस्पर्शादारभ्य चासौ मुक्तः । ततः पूर्वस्सर्वोप्युपायव्यापारः" इति ।

जिज्ञासाधिकरणभाष्येपि—

"तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानाभ्यासार्धेयातिशयस्य प्रयाणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वा" दिति ;

" अभ्यासाधेयातिशयस्य " — पूर्वपूर्वस्मृतिपरम्पराप्रयोज्यशक्ति-विशेषविशिष्टस्येत्यर्थः ; तथाच विद्याभेदेन शक्तिभेदस्य तदवच्छिन्न-कारणताभेदस्य च कल्पनापेक्षया सर्वविद्यास्वेकस्या एव शक्तेस्तदवच्छि-न्नैककारणताया एव च कल्पनमुचितमिति ।

मैवं - विद्याभेदेन कारणताभेदानुपगमे 'विकल्पोऽविशिष्टफलत्वा' दित्यधिकरणविरोधः, सद्विद्यादहरविद्यादीनां मोक्षं प्रति दण्डचक्रादि-न्यायेन तृणारणिमणिन्यायेन वा हेतुत्वमिति विशयेन तासां तृणा-रणिमणिन्यायेनामिलितानामेव कार्योत्पादकत्वमिति सिद्धान्तस्य तदधि-करणसिद्धत्वात् । सूत्रार्थस्तु, विद्याविकल्पः - एकविद्यावृत्तिमोक्षोत्पादप्रयो-जकतावच्छेदकसमुदायत्वशून्यत्वेसति मोक्षोत्पादप्रयोजकतावच्छेदकसमु-दायत्ववत्त्वमन्यविद्यानाम् । अत्र मोक्षप्रयोजकैककसामग्रीशरीरे विद्या-द्वयस्यानिवेशेन निरुक्तविकल्प उपपद्यते । अविशिष्टफलत्वञ्च - एक-विद्याविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकमोक्षकत्वम् । तथाच दहरादिविद्या सद्विद्यावृत्तिमोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति मोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्ववती, सद्विद्याविरहविशिष्ट स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकमोक्षकत्वात्, यत्र यद्धर्मावच्छिन्नविरह-विशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकयद्धर्मावच्छिन्नकत्वम्, तत्र तद्धर्मा-वच्छिन्ननिष्ठतद्धर्मावच्छिन्नोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति तद्धर्मावच्छिन्नोत्पादकतावच्छेदकसमुदायत्ववत्त्वमिति सामान्यमुखव्याप्तौ तृणारण्यादिकं दृष्टान्तः । अरण्यादौ तृणत्वावच्छिन्नविरहविशिष्टस्वक्षणा-व्यवहितोत्तरक्षणोत्पत्तिकवह्नित्वावच्छिन्नकत्वस्य तृणनिष्ठवह्नित्वावच्छिन्नो-त्पादकतावच्छेदकसमुदायत्वशून्यत्वे सति वह्नित्वावच्छिन्नोत्पादकतावच्छेदक समुदायत्वस्य च सत्त्वात् । तथाच सर्वविद्यानामनुगतरूपेण मोक्षं प्रत्येकहेतुतास्वीकारे मोक्षसामग्रीशरीरेप्यनुगतरूपेणैव विद्यानां निवेश्य-तया एकविद्यावृत्तितादृशसमुदायत्वशून्यत्वमितरविद्यानां दुर्घटमिति निरु-क्तविकल्पानुपपत्तिः ।

यदिचैकयैव विद्यया मोक्षनिर्वाहात् एकविद्यानिष्ठस्य विद्यान्तरेण प्रयोजनं नस्तीत्येव तदधिकरणतात्पर्यम्, सूत्रार्थस्तु - स्वानिष्पाद्यफल-निष्पादकत्वस्वसामानाधिकरण्योभयसम्बन्धेन सद्विद्याविशिष्टान्यत्वमेव दहरादिविद्यानां सद्विद्यया सह विकल्पः, अविशिष्टफलत्वं च तज्जन्य फलविजातीयफलजनकत्वाभाव :, तथाच दहरविद्योक्तोभयसम्बन्धा-वच्छिन्नसद्विद्यानिष्ठावच्छेदकताकभेदवती, तज्जन्यफलविजातीयफलाजनक त्वात्, यो यज्जन्यफलविजातीयफलाजनकः, स तन्निष्ठावच्छेदकताक भेदवानिति सामान्यतो व्याप्तिर्बोध्या । स्वजन्यफलविजातीयत्वं च स्व-गोचरप्रवृत्तिहेतुभूतेच्छाजनकेच्छाविषयतावच्छेदकीभूतधर्मशून्यत्वम्, स्व-साध्यकप्रवृत्त्युद्देश्यतावच्छेदकधर्मशून्यत्वपर्यवसितम् । विद्यासामान्यगोचर प्रवृत्तेर्मोक्षेच्छाधीनत्वादुक्तहेतूपपत्तिः । अयमेवार्थो भाष्यारूढः । तथाच तदधिकरणभाष्यम्—

" विद्यानां विकल्प एव, न समुच्चयस्सम्भवति, कुतः ? अविशिष्ट फलत्वात् । सर्वासां हि ब्रह्मविद्यानामनवधिकातिशयानन्दब्रह्मानुभवः फल-मविशिष्टं श्रूयते 'ब्रह्मविदाप्नोति परम्' इत्यादिभ्यः । ब्रह्महि स्वस्य परस्य च स्वयमनुभूयमानमनवधिकातिशयानन्दं भवति । सच तादृशानुभव एकया विद्ययाऽवाप्यते चेत्किमन्ययेति न समुच्चयसम्भवः॥ " इति

अस्मिन्नेवार्थे उत्तर सूत्रस्वारस्यम् । "काम्यास्तु यथाकामं समुच्चीयेरन्नवा पूर्वहेत्वभावा " दित्युत्तरसूत्रम् । अयमर्थः- ब्रह्मप्राप्तिव्यतिरिक्तफलास्तु विद्याः फलभूयस्त्वापेक्षायां समुच्चीयेरन्, तद्विरहे तु विकल्पेरन्, तासां परिमितफल त्वात् ; तथाच काम्यविद्यासु भूयःफलेच्छावत्पुरुषनिष्ठा काचिदुक्तो-भयसम्बन्धेनापरविद्याविशिष्टा, तज्जन्यफलविजातीयफलजनकत्वात्, भूयः फलेच्छाशून्यपुरुषनिष्ठाच काचित्सामानाधिकरण्यसम्बन्धावच्छिन्नापरविद्या-निष्ठावच्छेदकताकभेदवती, अपरविद्याजन्यफलेच्छारहितपुरुषनिष्ठत्वादिति पर्यवसितम् । इत्थञ्च अनुगतरूपेण विद्यानां मोक्षं प्रत्येकहेतुतास्वी

कारेपि नोक्ताधिकरणविरोध इति विभाव्यते; तदापि 'नानाशब्दादि भेदादि' ति पूर्वाधिकरणविरोधो दुरुद्धरः, तत्र हि साध्यतया विवक्षितं सर्वविद्यानां नानात्वं न तावत्स्वप्रतियोगिवृत्तित्व स्वानुयोगिवृत्तित्वोभय सम्बन्धेन भेदविशिष्टविद्यात्वव्याप्यधर्मवत्त्वम्, तथा सति ध्यानव्यक्ति रूपाणां विद्यानां परस्परभेदमात्रसिद्धचा उद्देश्यासिद्धेः; तथाहि—गुणोप संहारपादोपक्रमेहि 'सर्ववेदान्तप्रत्यय' मित्यादिना छान्दोग्यवाजसने-यकयोश्श्रुताया वैश्वानरविद्याया ऐक्यं व्यवस्थापितम्; तत्र हि न तावत्स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यवैश्वा-नरविद्यात्ववत्त्वरूपमैक्यं व्यवस्थापयितुं युक्तम्, पुरुषभेदभिन्नध्यानरूपाणां वैश्वानरविद्याव्यक्तीनां निरुक्तैक्यस्य बाधात्, यागव्यक्तिभेदेपि यजेतेत्यादि चोदनैक्यस्य सिद्धत्वेन 'चोदनाद्यविशेषा' दित्युक्तहेतोर्व्यभिचारापत्तेश्च; किन्तु मोक्षनिरूपितैककारणतावत्त्वम्, तथाच 'सर्ववेदान्तप्रत्ययमेक मुपासनम्' इति भाष्यस्यापि छान्दोग्यवाजसनेयकयोः प्रतीयमानं वैश्वानरो-पासनमेककारणतावदित्यर्थः; ततश्च छान्दोग्यप्रतिपन्नवैश्वानरविद्या वाजस नेयप्रतिपन्नवैश्वानरविद्यानिष्ठकारणतावतीति फलितम्; एवंच तस्मिन्पादे चिन्त्यमानस्यैक्यस्यैककारणतारूपत्वात् नानात्वस्य कारणताभेदरूप-त्वात् प्रकृते नानाकारणतावत्त्वं स्वनिरूपितकार्यतावच्छेदकावच्छिन्नकार्य तानिरूपितत्वस्वासामानाधिकरण्योभयसम्बन्धेन विद्यानिष्ठकारणताविशिष्ट-कारणतावत्त्वपर्यवसितं नानात्वमेव सिषाधयिषितम्। तत्तदव्यवहितोत्तर मोक्षत्वस्य तत्तद्विद्याजन्यतावच्छेदकत्वेपि सर्वविद्याजन्यतावच्छेदककोटौ मोक्षत्वस्य निवेशात् उक्तोभयसम्बन्धेनैकविद्यानिष्ठकारणतावत्त्वमपरविद्या-नामव्याहतम्। तस्मात् अनुगतरूपेण विद्यानां कारणत्वं सिद्धान्त विरुद्धम्। एवं प्रत्येकं विद्यानामपि भिन्नाभिन्नशक्तिमत्त्वेन कारणताङ्गी-कारे विद्यैक्यस्थले गुणोपसंहारस्वीकारो निष्फलः, तत्तद्विद्योदितगुण विषयतानां तत्तद्विद्यानिष्ठकारणतावच्छेदकत्वे च कारणतैक्यरूपविद्यैक्य

सम्पादकतया गुणोपसंहारस्य सार्थकता, कारणतैक्यरूपविद्यैक्यवत्तया विवक्षितयोरपि ध्यानयोः परस्पराविलक्षणगुणविषयतावत्त्वे कारणतावच्छेदकभेदेन कारणतैक्यानुपपत्तेः । गुणोपसंहारो हि एकविद्यात्वेनाभिमतासु ध्यानव्यक्तिषु एकरूपगुणविषयतावत्त्वम् । अतः दहरादिविद्यानान्निरूप्यनिरूपकभावापन्नविषयतावत्त्वेनैव मोक्षं प्रति कारणत्वमुचितम् । नचैवं विनिगमनाविरहेण कारणताबाहुल्यापत्तिः, विलक्षणविषयतासम्बन्धेन तत्तद्गुणावच्छिन्नब्रह्मविशिष्टध्यानत्वेनैव कारणतास्वीकारेण निरूप्य निरूपकभावापन्नविषयतायाः कारणतानवच्छेदकत्वात् । नचैवं भ्रमप्रमासाधारण्येन कारणत्वानुपपत्तिः, इष्टत्वात् । मोक्षं प्रति भ्रमस्य कारणत्वाभावाच्च । अनुमित्यादिस्थलीयकारणतायामपि विलक्षणविषयितासम्बन्धेन व्याप्त्यादिविशिष्टविषयस्यैवावच्छेदकत्वम् । सिद्धान्ते भ्रमानङ्गीकारेण सर्वत्र विशिष्टविषयस्यैवावच्छेदकत्वे बाधकविरहात् । विषयस्य कारणतावच्छेदकत्वासम्भवस्थल एव विषयतायाः कारणतावच्छेदकत्वस्य कल्पयितुमुचितत्वात् । विषयस्य कारणतावच्छेदकत्वसम्भवेपि विषयतायास्तथात्वे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गात् । अत एव यत्र व्याप्त्यादिज्ञानं प्रमात्मकमेव, तत्र विशिष्टविषयस्यैव तत्स्थलीयानुमितिकारणतावच्छेदकत्वं नैयायिकैरपि स्वीकृतम् । प्रपञ्चितं चेदं वादान्तरे। नच विशिष्टविषयकज्ञानत्वेनैव हेतुत्वे शरीरपातपर्यन्तं विळम्बानुपपत्तिरिति वाच्यम् , अमानवकरस्पर्शस्यापि मुक्तिप्रति कारणतास्वीकारेण तदभावादेव शरीरसत्तादशायाम्मोक्षानुपपत्तेः । अमानवकरस्पर्शस्य मोक्षहेतुत्वञ्च गतिशास्त्रादवगम्यते । नच विद्यानां शक्तिमत्त्वेन कारणत्वास्वीकारे "निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षे " ति 'परं जैमिनि' रिति सूत्रभाष्यविरोध इति वाच्यम् , तत्र निष्पत्तिशब्देन शक्तेरनभिधानात् । पाकनिष्पत्तिरित्यादौ निष्पत्तिशब्दस्यातीतकृतिविषयत्वपरत्वेन शक्तिपरतायाः क्वाप्यदर्शनात् । कृतावतीतत्वं च स्वोत्पत्त्यधिकरणक्षणवृत्तिकृतिजन्यफलानुकूलव्यापारानुकूलत्वप्रतियोगित्वोभयसम्बन्धेन वर्तमानध्वंसाविशिष्टत्वम् ।

द्वितीयादिदिवसीयकार्यस्याद्य निष्पन्नत्वव्यवहारवारणाय प्रतियोगित्व-निवेशः । अनेककृतिसाध्यकार्यस्य कतिपयकृतिक्षणे सिद्धत्वव्यवहारवार णाय प्रथमसम्बन्धनिवेशः । तथाच 'निश्शेषे' त्यादिभाष्यस्य निश्शेषा-विद्यानिवर्तनरूपा निश्शेषाविद्यानिवृत्तिहेतुभूता, या विद्या, तन्निष्पत्तिरपि तन्निष्ठातीतकृतिविषयतापि, विशिष्टदेशगतिप्रयोज्येत्यर्थः । यद्वा निश्शेषा विद्यानिर्वतनरूपेत्यस्य निश्शेषाविद्यानिवृत्त्यभिन्नेत्यर्थः, तस्य च निष्पत्ति पदार्थघटकस्वोत्पत्त्यधिकरणक्षणवृत्तिकृतिजन्याक्रियाजन्यफलेन्वय इति बोध्यम् । एवमभ्यासाधेयातिशयस्येति जिज्ञासाधिकरणभाष्यस्यापि स्मृतिपरम्पराप्रयोज्यलौकिकविषयताकस्येत्यर्थः । अनवरतभावनावशात् ध्यान व्यक्तिषु लौकिकविषयता सम्भवतीति पूर्वमेवोक्तम् । तथाच विशिष्ट विषयकध्यानत्वेन हेतुत्वे न काप्यनुपपत्तिरित्यन्यत्र विस्तरः ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम्॥

इति श्रीशैलानन्तपूरुषकुलतिलकेन यादवाद्रिनिवासिना अनन्तार्येण

विरचितो

मोक्षकारणतावादः ।